श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - १९

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः
श्रीमते कृष्णाय परब्रह्मणे नमः
श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - १९

*प्राचेतसकथानुवर्णनम्*

पृथोस्तु नप्ता पृथुधर्मकर्मठः प्राचीनबर्हिर्युवतौ शतद्रुतौ।
प्रचेतसो नाम सुचेतसस्सुतानजीजनत् त्वत्करुणाङ्कुरानिव॥ १ ॥

पितुः सिसृक्षानिरतस्य शासनात् भवत्तपस्याभिरता दशापि ते।
पयोनिधिं पश्चिममेत्य तत्तटे सरोवरं सन्ददृशुर्मनोहरम्॥ २ ॥

तदा भवत्तीर्थमिदं समागतो भवो भवत्सेवकदर्शनादृतः।
प्रकाशमासाद्य पुरः प्रचेतसाम् उपादिशत् भक्ततमस्तवस्तवम्॥ ३ ॥

स्तवं जपन्तस्तममी जलान्तरे भवन्तमासेविषितायुतं समाः।
भवत्सुखास्वादरसादमीष्वियान् बभूव कालो ध्रुववन्न शीघ्रता॥ ४ ॥

तपोभिरेषामतिमात्रवर्धिभिः स यज्ञहिंसानिरतोऽपि पावितः।
पिताऽपि तेषां गृहयातनारदप्रदर्शितात्मा भवदात्मतां ययौ॥ ५ ॥

कृपाबलेनैव पुरः प्रचेतसां प्रकाशमागाः पतगेन्द्रवाहनः।
विराजि चक्रादिवरायुधांशुभिः भुजाभिरष्टाभिरुदञ्चितद्युतिः॥ ६ ॥

प्रचेतसां तावदयाचतामपि त्वमेव कारुण्यभराद्वरानदाः।
भवद्विचिन्ताऽपि शिवाय देहिनां भवत्वसौ रुद्रनुतिश्च कामदा॥ ७ ॥

अवाप्य कान्तां तनयां महीरुहां तया रमध्वं दशलक्षवत्सरीम्।
सुतोऽस्तु दक्षो ननु तत्क्षणाच्च मां प्रयास्यथेति न्यगदो मुदैव तान्॥ ८ ॥

ततश्च ते भूतलरोधिनस्तरून् क्रुधा दहन्तो द्रुहिणेन वारिताः।
द्रुमैश्च दत्तां तनयामवाप्य तां त्वदुक्तकालं सुखिनोऽभिरेमिरे॥ ९ ॥

अवाप्य दक्षं च सुतं कृताध्वराः प्रचेतसो नारदलब्धया धिया।
अवापुरानन्दपदं तथाविधस्त्वमीश वातालयनाथ पाहि माम्॥ १० ॥

**********